पर्य्यायः। उद्गतं २। इत्यमरः॥

उद्वान्तः,पुं,(उद्गतं वान्तं मदो यस्मात्।)निर्म्मदहस्ती। इति मेदिनीकरजटाधरौ॥

उद्वासनं, क्ली, (उत्+वस्+णिच्+ल्युट्।) मारणम्। बधः। इत्यमरः॥ (संस्कारभेदः। यथा, कात्यायने ६।१।२॥

"अथ उपसृज्य शालाद्वार्य्ये परिस्तरणपात्रसंसादनप्रोक्षणाज्यनिर्वपणाधिश्रयणस्रुक्सम्मार्ज्जनोद्वासनावेक्षणानि कृत्वाग्नीन् उत्पूय पश्चात् आज्यग्रहणम्"॥)

उद्वाहः,पुं,(उत्+वह+घञ्।) विवाहः। इत्यमरः॥ तस्य लक्षणं भार्य्यात्वसम्पादकग्रहणम्। तस्य स्वीकाररूपज्ञानविशेषस्य समवायविषयतयोर्भेदात् वरकन्ययोर्विवाहकर्तृत्वकर्म्मत्वे। स तु अष्टविधः। वरमाहूय यथाशक्त्यलङ्कृता कन्या यत्र दीयते स ब्राह्मः १। यत्र यज्ञस्यार्त्विजे कन्यादानं स दैवः २। यत्र वरात् गोद्वयं गृहीत्वा तेनैव सह कन्यादानं स आर्षः ३। यत्र अनया सह धर्म्मं चरतां इति नियमं कृत्वा कन्यादानं स कायः ४। यत्र धनं गृहीत्वा कन्यादानं स आसुरः ५। यत्र कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं मे पतिरिति निश्चयः स गान्धर्व्वः ६। यत्र बलात्कारेण कन्याहरणं स राक्षसः ७। यत्र सुप्तायां मत्तायां प्रमत्तायां वा कन्यायां निर्ज्जने गमनं स पैशाचः ८। तस्य निर्णयः। सगोत्रामनवरवयस्कां समानप्रवरां पितृपेक्षयोर्द्ध्वतनसप्तां पुरुषाणां पुत्त्रकन्यासन्ततिपरम्परया प्रत्येकसप्तमीपर्य्यन्तां अधस्तने तदपेक्षया सप्तमीपर्य्यन्तां पितृबन्धपेक्षयोर्द्ध्वतनपञ्चां प्रत्येकापेक्षया सप्तमीपर्य्यन्तां अधस्तने तदपेक्षया सप्तमी पर्य्यन्तां मातामहसमानोदकां मातामहापेक्षयोर्द्ध्वतनचतुर्णां पुरुषाणां पुत्त्रकन्यासन्ततिपरम्परया प्रत्येकापेक्षया पञ्चमीपर्य्यन्तां अधस्तने तदपेक्षया पञ्चमीपर्य्यन्तां मातृबन्धपेक्षयोर्द्ध्वतनचतुर्णां प्रत्येकापेक्षया पञ्चमीपर्य्यन्तां अधस्तने तदपेक्षया पञ्चमीपर्य्यन्ताञ्च कन्यां परित्यज्य उद्वाहः कर्त्तव्यः॥ पितृबन्धुमातृबन्धुविरहेऽपि तयोर्योग्यतामवलम्ब्य सप्तमीपर्य्यन्तायाः पञ्चमीपर्य्यन्तायाश्च कन्यायाः परिहारः। वर्ज्जनीयानां कन्यानां मध्येऽपि या त्रिगोत्रान्तरिता सा विवाह्या। अत्र सप्तमगणनप्रतियोगिपितृपितृबन्धुपञ्चमगणनप्रतियोगिमातामहमातृबन्धुगोत्रमादायैव त्रिगोत्रगणनम्। शूद्रस्य सगोत्राविवाहे दोषाभावः। मातृसपत्नीभ्रातृकन्यां स्वदौहित्रीं अध्यापयितृकन्यां शिष्यकन्यां भ्रातृदारकन्याञ्च परित्यज्य विवाहः कर्त्तव्यः॥ अथ कन्यादानाधिकारिणः। आदौ पिता। तदभावे पितामहः। तदभावे भ्राता। तदभावे पितृज्ञातिः। तदभावे मातामहः। तदभावे मातुलः। तदभावे माता। तदभावे मातामहज्ञातिः। एतेषामप्यभावे कन्या स्वयं वरं कुर्य्यात्॥ अथ विवाहपूर्व्वकर्त्तव्यकर्म्म। अवश्यंभावि शुभाशुभग्रहादिदोषशान्त्यर्थं होमो हिरण्यगोवस्त्रदानम्। ततो नान्दीश्राद्धम्। लग्नसमये वरे उपस्थिते स्वस्तिवाचनादिकं विधाय वरणम्। स्त्र्याचारादि। ततः कन्यादानं यथाशक्ति धनदानञ्च। ततः स्वगृह्योक्तविधिनाग्निं संस्थाप्य कुशण्डिकां समाप्य पाणिग्रहणं सप्तपदीगमनञ्च कर्त्तव्यम्। ०। ज्येष्ठेऽकृतविवाहे विवाहकर्त्ता कनिष्ठः परिवेदनदोषविशिष्टो भवति। ज्येष्ठः परिविन्नः। सा कन्या परिवेदनीया। कन्यादाता परिदायी। तत्पुरोहितः परिकर्त्ता। ते सर्व्वे पतिताः। किन्तु देशान्तरस्थक्लीवैकाण्डवैमात्रेयवेश्यासक्तशूद्रतुल्यातिरोगिजड़मूकान्धवधिरकुब्जवामनकुण्ठातिवृद्धनैष्ठिकब्रह्मचारिवानप्रस्थभिक्षुकृषिसक्तनृपसक्तधनवृद्धिप्रसक्तकामकारिदत्तकोन्मत्तचौरेषु ज्येष्ठेष्वनूढ्वेष्वपि कनिष्ठविवाहे न दोषः। एवं विक्षतरूपानूढ़ा ज्येष्ठा कनिष्ठायाः सोदराया ऊढ़ायाः परिवेदनाय न भवति। इत्युद्वाहतत्त्वम्॥

उद्वाहनं, क्ली, (उत्+वह+णिच्+ल्युट्।) विवाहः। तत्पर्य्यायः। रञ्जरणं २। इति त्रिकाण्डशेषः॥ द्विसीत्यम्। द्विवारकृष्टक्षेत्रम्। इति हेमचन्द्रः॥

उद्वाहनी, स्त्री, (उद्वाहन+ङीप्।) वराटकः। इति हेमचन्द्रः॥ कड़ि इति भाषा॥

उद्वाहिकः, त्रि, (उद्वाहस्यायम्। उद्वाह+ठक्।) उद्वाहसम्बन्धी॥ (यथा, मनुः।९।६४।)

"नोद्वाहिकेषु मन्त्रेषु विधवावेदनं क्वचित्"॥)

उद्वाहितः, त्रि, (उत्+वह+णिच्+क्त।) उद्वहितः। उद्धृतः। विवाहितः। यथा। राजमार्त्तण्डे देवलः।

"बाले वृद्धे तथैवान्ते कुरुते दैवमन्तिमे।
उद्वाहितायां कन्यायां दम्पत्योरेकनाशनम्"॥

इति ज्योतिषतत्त्वम्॥ (कलिकाले आगमोक्तान्यमार्गेण विवाहिता गर्हिता भवति। यथा,—

"उद्वाहितापि या नारी जानीयात् सा तु गर्हिता"
इत्यागमसिद्धान्तः॥)

उद्वाहिनी, स्त्री, (उद्वहति उद्धरतीति। उत्+वह+णिनि+ङीप्।) रज्जुः। इति मेदिनी॥

उद्वाहुः, त्रि, (उदूर्द्ध्वे वाहू यस्य।) ऊर्द्ध्वबाहुः। उद्वेगशब्दार्थे हेमचन्द्रेण लिखितः॥ (यथा, रघुः।१।३।

("प्रांशुलभ्ये फले लोभादुद्वाहुरिव वामनः"॥)

उद्वाहुकं, क्ली, ऊर्द्ध्वीकृतबाहुः। उद्वेगशब्दार्थे मेदिनीकरेण लिखितम्॥

उद्विग्नः,त्रि, (उत्+विज+क्त। ओदितश्चेति तस्य नः। श्वीदित इति नेट्।) उद्वेगयुक्तः। यथा,—

"तैर्व्वृक्षपातसंभ्रमदुःखभिन्नविपन्नकैः।
निमग्नोद्विग्नसंक्लीनैः पप्रे दीनेव मेदिनी"॥

इति भट्टिकाव्ये ४।४१॥ (तथा च भारते,—

"नोद्विग्नश्चरते धर्म्मं नोद्विग्नश्चरते क्रियाम्"॥)

उद्विबर्हणं, क्ली, (उत्+वि+बृह+ल्युट्।) उद्धारकरणम्। यथा,—

"कः श्रद्धधीतान्यतमस्तव प्रभो
रसाङ्गताया भुव उद्विबर्हणम्"।

इति श्रीभागवते १३।४३॥ उद्विबर्हणं उद्धरणम्। इति तट्टीकायां श्रीधरस्वामी॥

उद्वृत्तः, त्रि, (उत्+वृत्+क्त। वृत्ताच्चरित्रात् उत्क्रान्तो वा।) उत्तोलितः। उत्क्षिप्तः। परिभुक्तोज्झितः। उद्वान्तः। इति हेमचन्द्रो मेदिनी च॥ दुर्वृत्तः॥ (यथा, महाभारते,—

'उद्वृत्तान् सततं लोकान् राजा धर्म्मेण शास्ति वै"॥)

उद्वेगं, क्ली, (उद्विज्यतेऽनेन इति। उत्+विज्+घञ्।) गुवाकफलम्। इत्यमरः॥

उद्वेगः, पुं, (उत्+विज्+भावे घञ्।) उद्वेजनम्। तत्पर्य्यायः। उद्भ्रमः २। इत्यमरः॥ चमत्कारः। इति भरतः॥ विरहजन्यदुःखम्। इति रसमञ्जरी॥ भयं। इति हेमचन्द्रः। उद्वाहुलकम्। उद्गमनम्। इति मेदिनी॥

("त्वयारम्भे हर पशुपतेरार्द्रनागाजिनेच्छाम्।
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या"॥

इति मेघदूते पूर्व्वमेघे ३७ श्लोकः॥

"सदयं बुभुजे महाभुजः
सहसोद्वेगमियं व्रजेदिति"।

रघुः ८।७।

"संक्षोभेष्वप्युद्वेगो माधुर्य्यं परिकीर्त्तितम्"।

इति साहित्यदर्पणे॥ ३य परिच्छेदः॥)

उद्वेगः, त्रि, (उद्गतो वेगो यस्मात्।) स्तिमितः। शीघ्रगामी। ऊर्द्ध्वबाहुः। इति हेमचन्द्रः॥

उद्वेजनं, क्ली, (उत्+विज+ल्युट्।) उद्वेगः॥

("परदाराभिमर्षेषु प्रवृत्तान् नॄन् महीपतिः।
उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्"॥

इति मनुः॥ ८। ३५२॥)

उधः, [स्] क्ली, (वहति उनत्ति वा। वह प्रापणे उन्द क्लेदने वा+असुन्।) ऊधः। इत्यमरटीकायां रमानाथः॥ गवर पालान् इति भाषा॥

उध्रस ग उञ्छे। इति कविकल्पद्रुमः॥ (क्र्यादिं-परं-सकं-सेट्।) एतस्यादौ पञ्चमस्वरः। मध्ये केवलधकारस्याधो रेफः। क्र्यादावुध्रस उञ्छ इत्ययमुदित्त्वौरादिकः पच्यते तस्य ध्रासयतीति रूपं अपरं ध्रसाति। येषां मते उत्पूर्व्वस्य गणद्वयेऽपि पठनं तेषां मते ध्राविधावुध्रसाति निगद्यते किंचि क्वतेऽप्युभ्रासयत्यन्यतः। अत्र उत्पूर्व्वस्येति तु उत् उकारः नतूपसर्गः। ग उध्रसाति शस्यं दीनः। इति दुर्गादासः॥

उध्रस क उत्क्षेपे। उञ्छे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क उध्रासयति धूलिं वायुः। इति दुर्गादासः॥

उन्द, ई ध क्लेदे। इति कविकल्पद्रुमः॥ (रुधां-परं-सकं-सेट्।) रुधादिः। क्लेद आर्द्रभावः। ध उनत्ति वस्त्रं पयसा। ई उन्नः उत्तः। उन्दिदिषति। इति दुर्गादासः॥

उन्दरः, पुं, उन्दुरः इति द्विरूपकोषः॥

उन्दुरः, पुं, (उन्द+उर।) मूषिकः। इति भरतो द्विरूपकोषश्च॥ इन्दुर इति भाषा॥

उन्दूरः, पुं, (उन्द+ऊर।) जन्तुविशेषः। इन्दुर इति भाषा। तत्पर्य्यायः। मूषिकः २ आखुः ३। वृष.